# Parashambhumahimnastava

# પરશમ્ભુમહિમ્નસ્તવઃ

## Document Information

Text title : Parashambhumahimnastava

File name : parashambhUmahimnastavadUrvAsa.itx

Category : shiva

Location : doc_shiva

Author : Rishi Durvasa

Transliterated by : Sunder Hattangadi

Proofread by : Sunder Hattangadi

Latest update : August 22, 2015

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 3, 2022

*sanskritdocuments.org*

# પરશમ્ભુમહિમ્નસ્તવઃ

શિવાભ્યાં નમઃ

પરશમ્ભુમહિમ્નસ્તવઃ

અનુક્રમણિકા શ્લોકસઙ્ખ્યાસહિતં


१ ઉપોદ્ઘાતપ્રકરણં પ્રથમમ્ ॥ ૧॥ ૧૮

૨ પરાશક્તિસ્કન્ધરશ્મિપ્રકરણં દ્વિતીયમ્ ॥ ૨॥ ૭

૩ ઇચ્છાશક્તિસ્કન્ધરશ્મિ પ્રકરણં તૃતીયમ્ ॥ ૩॥ ૮

૪ જ્ઞાનશક્તિસ્કન્ધરશ્મિપ્રકરણં ચતુર્થમ્ ॥ ૪॥ ૬

૫ ક્રિયાશક્તિસ્કન્ધરશ્મિપ્રકરણં પઞ્ચમમ્ ॥ ૫॥ ૧૨

૬ કુણ્ડલિનીશક્તિસ્કન્ધરશ્મિપ્રકરણં ષષ્ઠમ્ ॥ ૬॥ ૬

૭ માતૃકાશક્તિસ્કન્ધરશ્મિપ્રકરણં સપ્તમમ્ ॥ ૭॥ ૧૦

૮ ષડન્વયરશ્મિવિવેકસ્કન્ધપ્રકરણમષ્ટમમ્ ॥ ૮॥ ૫

૯ પાવકધ્યાનયોગપ્રકરણં નવમમ્ ॥ ૯॥ ૧૧

૧૦ મહાવિભૂતિપ્રકરણં દશમમ્ ॥ ૧૦॥ ૧૭

૧૧ અન્તર્યાગોપાચારપરામર્શપ્રકરણમેકાદશમ્ ॥ ૧૧॥ ૮

૧૨ શાન્તિપ્રકરણં દ્વાદશમ્ ॥ ૧૨॥ ૧૨

૧૩ ઉપસંહારપ્રકરણં ત્રયોદશમ્ ॥ ૧૩॥ ૨૧


પૂર્ણસ્તવશ્લોકસઙ્ખ્યા ૧૪૧

---

૧. પ્રથમં પ્રકરણં ઉપોદ્ઘાત

અનેકશક્તિસઙ્ઘટ્ટપ્રકાશલહરીતનુઃ ।
શુદ્ધસંવિચ્છિવઃ પાયાદ્વિભુઃ શ્રીપરમેશ્વરઃ ॥

શ્રીશમ્ભો તે મહિમ્નઃ સ્તુતિપથરચિતાઃ સાઙ્ગવેદાઃ સશાસ્ત્રાઃ
  સિદ્ધાન્તાઃ સાઙ્ગવિદ્યાઃ સચકિતમતયો નૈવ પશ્યન્તિ પારમ્ ।
સાધન્તાસ્ત્વામનન્તં પરમશિવગુરું તે કથં વર્ણયેયુ-
  સ્તસ્માત્પ્રજ્ઞાનુસારાદહમપિ ભવતઃ સ્તૌમિ કિઞ્ચિચ્ચરિત્રમ્ ॥ ૧॥

ક્વાનન્દાત્મપ્રકાશસ્તવ પરમહિમાપારપીયૂષસિન્ધુ-
સ્ત્વદ્ભક્ત્યામોદમગ્નાઃ ક્વ ચ કવિમધુપા બ્રહ્મવિષ્ણુપ્રમુખ્યાઃ ॥

શ્રીશમ્ભો મોહજૃમ્ભો ન જનયતિ પરાં સ્વાત્મવત્તાં કિમેત-
ચ્ચિત્રં તદ્વન્મયાપિ સ્વમતિવિભવતઃ સ્તૂયસે ત્વં ન દોષઃ ॥ ૨॥

શ્રીમદ્ભિર્દૃશ્યભાવૈરહમહમિદમિત્યાત્મજૃમ્ભાધિરૂઢૈ-
ર્નાનારૂપૈઃ પદાર્થૈરનવધિવિભવૈરાશુદેદીપ્યમાનઃ ।
સર્વાતીતસ્ત્વમેકઃ પરશિવચરણ સ્વપ્રકાશાત્મશમ્ભો
નાન્યસ્ત્વત્તઃ પરોઽસ્તીત્યહમિહ ગુરુણા ત્વાં સ્વભાવૈરવૈમિ ॥ ૩॥

આત્મૈવૈષ સ્વકીયો નિરતિશયચિદાનન્દસદ્બ્રહ્મપૂર્ણો
જિહ્મઃ સંસારભાવૈરતિદુરધિગમૈરાત્તમાયાવિલાસૈઃ ।
સર્વાત્મત્વાદનન્તસ્તવ શિવમહસઃ શ્રીગુરોઃ સત્યવાક્યૈઃ
નિસ્તર્કોપાધિભેદૈઃ પરમપુરુષ તે તત્ત્વમદ્વૈતમેતિ ॥ ૪॥

દીક્ષાં યઃ શામ્ભવીયાં શિવગુરુવિહિતાં દિવ્યબીજાગમોક્તાં
પ્રાપ્ય શ્રીશમ્ભુતાદાત્મ્યવિતરણચણાં જન્મમૃત્યુપ્રભેત્રીમ્ ॥

ભિત્વા ભેદ્યં પશુત્વં પરશિવચરણધ્યાનયોગેન પૂર્ણઃ
સ્વાઘોરબ્રહ્મવિદ્યાવિદિતપરપદં બ્રહ્મ સ પ્રૈતિ વિદ્વાન્ ॥ ૫॥

બ્રહ્માણ્ડં પિણ્ડમેતત્પિતરમિવ સુતસ્તત્સમં નૈકધર્મં
વિજ્ઞાયાજ્ઞાનમુક્તઃ શિવગુરુવચનૈરાત્મવિજ્ઞાનશાન્તઃ ।
સર્વાત્મૈકપ્રભોસ્તે પરશિવચરણારાધનાસક્તચિત્તો
યઃ કોઽપ્યેકઃ સ યોગી જયતિ જનિમૃતી ભો મહામૃત્યુમૃત્યો ॥ ૬॥

પિણ્ડે ષાટ્કોશિકેઽસ્મિન્નવવિવરપુરે પઞ્ચભૂતેન્દ્રિયાઢ્યે
પુંસ્કે સ્ત્રૈણે ચ ષાણ્ડે શિવગુરુવચનૈરત્ર વિજ્ઞાયસે ચેત્ ।
કેનાપ્યન્નાસુચિત્તપ્રમિતિનિરુપમાનન્દકોશાત્તરાશિ-
સ્ત્વં ષોઢા ભિન્નમૂર્તિઃ પરશિવ સ બુધો વિશ્વરૂપત્વમીયાત્ ॥ ૭॥

સર્વેશ શ્રીપુરેશ ત્રિભુવનભવનવ્યક્તયઃ શક્તયસ્તે-
ઽન્તાદ્યાઃ શ્રીપરાદ્યા નિરવધિવિભવા માતૃકાન્તાઃ ક્ષકાન્તાઃ ।
વિજ્ઞાતાઃ સ્યુઃ સ્વરૂપે યદિ શિવગુરુણા વિશ્વદૃશ્યપ્રપઞ્ચ-
સ્વાત્મજ્યોતિર્વિલીનાન્વિદધતિ વિદુષો યોગિનઃ સૈવ મુક્તિઃ ॥ ૮॥

યા ષોઢા પઞ્ચધા ચ પ્રકટિતવિભવા શ્રીપરા દેવ શમ્ભો
    સૈવ શ્રીસુન્દરીતિ શ્રુતિભિરભિનુતા ચક્રરાજાસનસ્થા ।
સર્વત્રાનેકકોટિપ્રકટિતગણનાયોગિનીર્વ્યશ્નુવાના
    ત્વત્તેજોઽન્તર્નિરૂઢા રચયતિ જગતામાદિમધ્યાન્તકાલાન્ ॥ ૯॥

યા શક્તિઃ પઞ્ચવાહપ્રવહણલહરીવ્યક્તનૈજાત્મતેજઃ
    સંવર્તાગ્નિપ્રપીતત્રિભુવનજલધિઃ કાલસઙ્કર્ષણી તે ।
દિક્કાલાતીતમૂર્તે પરશિવ મહતાં ભક્તિભાજામવિદ્યાં
    મૃત્યું વિજ્ઞાનદાનાત્પ્રહરતિ વિદુષાં તન્મહત્વં ત્વમેવ ॥ ૧૦॥

સર્વજ્ઞો નિત્યતૃપ્તઃ સદસદુભયઙ્ગોઽનાદિબોધઃ સ્વતન્ત્રો
    નિત્યા લુપ્તાત્મશક્તિર્નિરુપમચરિતોઽનન્ત ઇત્યઙ્ગષટ્કૈઃ ।
ષટ્ચ્છક્તિવ્યક્તભાવસ્ત્વમિહ યદિ શિવ જ્ઞાયસે દેશિકોક્ત્યા
    યેન સ્વાત્મન્યનાદૌ સકલવિલસિતં તે પરાયાઃ સ ભેદઃ ॥ ૧૧॥

ગાયત્રી વેદધાત્રી શતમખફલદા વેદશાસ્ત્રૈકવેદ્યા
    ચિચ્છક્તિં બ્રહ્મવિદ્યા પરમશિવ તવ શ્રીપરાં વ્યાકરોતિ ।
શબ્દબ્રહ્મૈક્યવાચ્યામખિલમતમિતિ વ્યક્તતત્ત્વામવાચ્યાં
    સપ્તસ્રોતોવિભૂતિં ત્રિભુવનમયતાં તત્ત્વતઃ સર્વતુર્યામ્ ॥ ૧૨॥

સંસારાસારભાવપ્રવહણચતુરામાદિશક્તિં પરાં તાં
    સ્વાત્માભિન્નાં વિદિત્વા વપુરનુમતિભિર્નાવૃતાહઙ્કૃતિસ્થઃ ।
ત્રૈલોક્યે બ્રહ્મવિશ્વપ્રસરમનવધિસ્વપ્રકાશપ્રપૂર્ણં
    જ્ઞાત્વા મુક્તઃ સ યોગી ભવતિ ગતભવસ્ત્વત્પ્રસાદાન્મહેશ ॥ ૧૩॥

વિશ્વેશ સ્વપ્રકાશપ્રસરમિહ વિના નાન્યદસ્તીતિ તત્ત્વં
    મીમાંસારૂપમેતત્તવ પરમગુરો શ્રીમુખામ્નાયજાલમ્ ।
સ્વપ્રત્યક્ષં વિહાય સ્વરહિતમિતિ ચેદસ્તિ ચાન્યત્ર તત્ત્વં
    યે ધીરાસ્તર્કયેયુસ્ત ઇહ જનિમૃતીરાપ્નુવન્ત્યઙ્ગભારૈઃ ॥ ૧૪॥

ન બ્રહ્મા વિષ્ણુરુદ્રૌ સુરપતિરમરા નાસુરા નૈવ પૃથ્વી
    નાપોઽગ્નિર્નૈવ વાયુર્ન ચ ગગનતલં નો દિશો નૈવ કાલઃ ।
નો વેદા નૈવ યજ્ઞા ન ચ રવિશશિનૌ નો વિયન્નો વિકલ્પઃ
    સ્વજ્યોતિઃ સત્યમેકં જયતિ તવ પદં સચ્ચિદાનન્દમૂર્તે ॥ ૧૫॥

શમ્ભો સૈદ્ધાન્તિકા યે સ્વમતિવિભવતોઽખર્વગર્વાઃ પ્રમાણૈઃ
    મીમાંસન્તે ભવન્તં બહુમતજનકૈરાવૃતા શુદ્ધવિદ્યૈઃ ।

અન્યોન્યસ્પર્ધિનસ્તે કથમિહ ભવતસ્તત્ત્વમીયુઃ સ્વતેજઃ
સર્વાતીતં વિકલ્પગ્રહરહિતમજં માનતર્કાદ્યગમ્યમ્ ॥ ૧૬॥

ધીરાઃ કેચિન્મહાન્તો ગુરુવચનરતાસ્ત્યક્તસંસારભાવા
નિઃશઙ્કાઘોરવિદ્યા પરિણતમતયઃ સર્વસઙ્કલ્પમુક્તાઃ ।
ત્વત્કારુણ્યાક્ષિલક્ષ્યાઃ પરમશિવ ભવત્સાધકાઃ પુણ્યપાપૈઃ
કૃત્યાકૃત્યૈર્વિહીનાઃ પરપદવિભવં ત્વાં પ્રપશ્યન્તિ વિશ્વમ્ ॥ ૧૭॥

સિદ્ધાન્તઃ શામ્ભવોઽયં શિવગુરુવચનાઘોરવિદ્યાક્ષરોક્તઃ
સ્તોત્રવ્યાજેન નિર્વાહ્યત ઇતિ ભવતઃ શ્રીવિભો ચાપલં મે ।
અત્ર ન્યૂનાતિરેકોક્તિજનિતમસકૃત્ક્ષમ્યતાં દાસબુદ્ધ્યા
મચ્ચિત્તસ્થઃ પ્રમેયં સમુપદિશ પરં માતૃકાવર્ણરાશિમ્ ॥ ૧૮॥

ઇતિ શ્રીદૂર્વાસકૃતપરશમ્ભુમહિમ્નસ્તવે
ઉપોદ્ઘાતપ્રકરણં પ્રથમમ્ ॥ ૧॥

---

૨. દ્વિતીયં પ્રકરણં પરાશક્તિસ્કન્ધરશ્મિ

શ્રીમદ્રશ્મિપ્રભાવં ત્રિભુવનભવનવ્યઞ્જકસ્વાત્મદીપં
કો વા વક્તું નિરુક્ત્યા પ્રભવતિ યતધીરાત્તસમ્યગ્વિમર્શઃ
યત્ર બ્રહ્માદિવિદ્વન્મતિરપિ વિગતિર્યાતિ ભીત્યા વિનાશં
શ્રુત્યા સાર્ધં સ કેન પ્રવિતતમતિના વર્ણ્યતે તે મહેશ ॥ ૧॥

ષણ્ણામપ્યન્વયાનાં ક્ષિતિજલદહનસ્પર્શનાકાશચેતઃ-
પીઠસ્થાનાં પરાદ્યાઃ પરશિવ ભવતઃ શક્તયો માતૃકાન્તાઃ ।
બ્રહ્માદિપ્રેતસિંહાસનગતવિભવૈસ્તાવકીયૈઃ ષડઙ્ગૈઃ
દ્વાત્રિંશદ્રશ્મિમુખ્યાઃ સ્વકિરણકરણવ્યાપ્તવિશ્વૈર્વિભાન્તિ ॥ ૨॥

બુદ્ધેઃ સમ્યગ્વિમર્શપ્રકટિતસરણેરર્થવદ્વાક્પ્રવૃતેઃ
યત્ર સ્થાને તુરીયે નવકલિતમહાવાક્યતત્ત્વે વિનાશઃ ।
તત્કિં જ્યોતિસ્તમો વા સદસદુભયગં કિન્ત્વમૂર્તં નુ મૂર્તં
નિર્ધારશ્ચેદ્વિનાશો ન હિ મતિવચસાં દેવ તસ્માત્પરસ્ત્વમ્ ॥ ૩॥

જ્ઞાનં યોગઃ પ્રકાશો વિધિરુભયમતિર્દેહધીઃ પ્રાણશૂન્યા-
હઙ્કારશ્ચાધિકામઃ સ્વવિષયમનઘં ચાશ્રયન્નન્તરાસ્તે ।
ઇત્યાત્માકાશસત્તા તવ પરિવિદિતા સમ્યગેતત્પ્રમેયા-
ધારેષ્વન્તર્ધૃતં યત્પયસિ તિલચયે તૈલવદ્ભાસિ હીશ ॥ ૪॥

ષટ્ત્રિંશત્તત્ત્વપુષ્પસ્તબકપરિમલસ્તાવકીયઃ સ તેજઃ-
    કલ્પદ્રુશ્ચેત્પ્રબુદ્ધઃ શિવગુરુવચસા સર્વતઃ સ્વાનુભૂતઃ ।
અદ્વૈતબ્રહ્મબુદ્ધિં જનયતિ વિદુષામેષ એવાસ્મદાદિ-
    બ્રહ્માન્તાત્મપ્રપઞ્ચે વિલસતિ ન પરોઽસ્તીતિ ચેત્પારિજાતઃ ॥ ૫॥

સ્વપ્રત્યક્ષેઽપિ તત્ત્વે કરતલફલવદ્વેત્તિ નાસૌ સ્વરૂપં
    નાનાસિદ્ધાન્તજાલપ્રલપિતજનિતાજ્ઞાનમોહાન્ધકારૈઃ ।
આક્રાન્તઃ પુણ્યપાપૈરધિગતનિધનૈરાત્મકર્મણ્યનાદૌ
    હેયોપાદેયબુદ્ધ્યા ભવ ઇતિ વિહિતસ્તે મહામાયયેશ ॥ ૬॥

એકોઽસૌ લક્ષણૈશ્ચેદખિલતનુગતૈરિન્દ્રિયાર્થૈરનેકૈઃ
    ભિન્નઃ સ્વાત્મપ્રકૃત્યા વિધિજનિમૃતિભિઃ સન્નિબદ્ધઃ કિમેતત્ ।
દેવત્વં માનુષત્વં વપુષિ મુજગતાં સર્વજીવાત્મકત્વં
    ધત્સે શૈલૂષવત્તે સ્મરતિ ન તુ પદં શ્રીમહાદેવમૂર્તે ॥ ૭॥

ઇતિ શ્રીદૂર્વાસકૃતપરશમ્ભુમહિમ્નસ્તવે
પરાશક્તિસ્કન્ધરશ્મિપ્રકરણં દ્વિતીયમ્ ॥ ૨॥

---

૩. તૃતીયં પ્રકરણં ઇચ્છાશક્તિસ્કન્ધરશ્મિ

સત્ત્વં ચિત્ત્વં મહત્ત્વં તવ પરમગુરોરાત્મશક્તેઃ પરાયાઃ
    પિણ્ડીકૃત્ય પ્રકૃત્યા પ્રથમરતિપતિવ્યાજકાલાન્તવહ્નિઃ ।
ભૂત્વા સંસારસૃષ્ટિસ્થિતિલયનિલયાધાતિ તોયાર્ણવાન્તં
    તન્વાનો નિર્મમેચ્છસ્ત્વમિહ વિજયસે વિષ્ણુમાયાવિભૂતે ॥ ૧॥

માયાયામન્તરસ્થઃ કુસુમશરરસસ્તાવકીયઃ સ્વકાલે
    જ્ઞાનજ્ઞેયપ્રમાતૃપ્રકટિતમહિમા સ્વપ્રરોહપ્રસારૈઃ ।
ઉત્પાદ્યાદ્યં વિરિઞ્ચં તદનુ ભુવનતામાત્મના વ્યશ્નુવાનો
    બીજાકારઃ સ્વયમ્ભૂરિતિ કથયતિ તે નામ વિશ્વાત્મસૃષ્ટેઃ ॥ ૨॥ ।

આદિક્ષાન્તાર્ણસૃષ્ટિં ત્રિભુવનભવનાભાસભૂમિં શિવાદિ-
    ક્ષિત્યન્તાત્મીયતત્ત્વાવલિવિકૃતગતિં વૈધસાણ્ડાન્તભૂમિમ્ ।
આત્મીયાનુત્તરેચ્છાગુણપરવશતાં પ્રાપ્ય સંવ્યશ્નુવાનઃ
    શ્રીશમ્ભો વિશ્વસૃષ્ટિર્ભવસિ નિજમલત્રય્યુપપ્રોષિતાત્મા ॥ ૩॥

ચત્વારઃ કાલતત્ત્વે તવ યુગપતયસ્તે ચ ધાતુશ્ચ પુત્રાઃ

વ્યાખ્યાતા દ્વાદશૈતે સ્થિતિકૃતિવિદિતાઃ સાવતારાઃ સદારાઃ ।
શ્રીકણ્ઠાદ્યાશ્ચ નાથા ધૃતયુગવિધયસ્ત્વન્નિયત્યુત્થિતાન્તા-
શ્ચૈતન્યા એવ તસ્માત્સ્થિતિરિતિ વિદિતસ્ત્વં સહસ્રાર્કદીપ્તે ॥ ૪॥

આત્મીયાનાદિરશ્મીનિહ ભવજનિતાનેકસિદ્ધાન્તજાલ-
વ્યામોહોદ્યદ્વિકલ્પાનૃતનિજવિષયાન્પુણ્યપાપાદિભેદૈઃ ।
દુર્જ્ઞેયાન્દેશિકોક્ત્યા પ્રવિમલવપુષિ સ્વપ્રકાશૈકવહ્નૌ
સ્વાત્મત્વેન પ્રબુદ્ધાઞ્ઝડિતિ વિજયતે યસ્ત્વદાત્માવિરોધઃ ॥ ૫॥

જાગ્રત્સ્વપ્નપ્રસુપ્તિપ્રકટિતવિભવૈરાત્મમાયાગુણૈઃ સ્વૈ-
ર્જ્ઞાનેચ્છાક્રોધરૂપૈર્વિધિહરિહરકૈરાવૃતે મોક્ષમાર્ગે ।
પાન્થાઃ કેચિત્સુધીરાઃ શિવગુરુવચનજ્ઞાનશાસ્ત્રાગ્નિદીપ્તા-
સ્તવત્કારુણ્યૈકરક્ષાપરિવિહિતભિયસ્ત્વાં પ્રયાન્ત્યાદિમૂર્તે ॥ ૬॥

ત્વં માયાકામદેવપ્રથમમસિ તતઃ સ્વસ્ય સૃષ્ટૌ વિધાતા
રક્ષાયાં વિષ્ણુરન્તે પ્રબલતરમહારુદ્રમૂર્તિઃ સ્વમૂર્તૌ ।
સત્યોઽનન્તઃ પ્રમાતા શિવગુરુરિતિ ચ સ્વાત્મમૂર્તિપ્રભાવૈઃ
સ્વેચ્છાવસ્થાગુણાઢ્યોઽપ્યગુણ ઇતિ વિભો વસ્તુતઃ સ્તૂયસે ત્વમ્ ॥ ૭॥

ઇચ્છાશક્ત્યા યયૈતત્કબલિતમખિલં તે જગજ્જાલરૂપં
સૃષ્ટિસ્થિત્યન્તવૃત્યા સરસિ જલધરાસારતુલ્યાત્મગત્યા ।
સૈવાનન્તાન્તરઙ્ગપ્રસરબહુવિધાનેકસઙ્કલ્પભાવૈ-
રાવિર્ભૂત્વા ત્વદઙ્ગપ્રકટનકૃતયે બોધસિન્ધુસ્ત્વમેવ ॥ ૮॥

ઇતિ શ્રીદૂર્વાસકૃતપરશમ્ભુમહિમ્નસ્તવે
ઇચ્છાશક્તિસ્કન્ધરશ્મિ પ્રકરણં તૃતીયમ્ ॥ ૩॥

---

૪. ચતુર્થ પ્રકરણં જ્ઞાનશક્તિસ્કન્ધરશ્મિ

સંવેદ્યં તત્ત્વજાલં પરશિવધરણીમૂલપારં વિચિત્રં
કર્માનન્તપ્રપઞ્ચં નિરુપમમહિમાનાદિમધ્યાવસાનઃ ।
બ્રહ્માનન્દામૃતાબ્ધિઃ સમરસવિધુના જૃમ્ભિતસ્વાત્મભાસો
હેતુત્વેન પ્રબોધજ્વલન તવ મહાજ્ઞાનશક્તિં વ્યનક્તિ ॥ ૧॥

ગોજં ક્ષીરં યથૈકં દ્યુતિવિવિધગુણસ્વેન્દ્રિયાર્થપ્રકાશોઽ-
પ્યેકસ્તદ્વર્ણનાનારુચિરધિકરણસ્યૈકતા કારણેન ।
નીલાદ્યાભાસબુદ્ધ્યા નભસિ પરિવૃતો ધૂમભાસૈરિવાગ્નિઃ

પ્રાચુર્યેણ પ્રદીપ્તઃ પરમશિવ તતઃ સત્યવિશ્વાત્મકસ્ત્વમ્ ॥ ૨॥

નિત્યાખણ્ડપ્રકાશાદમલતરવિભો ત્વત્સકાશાત્કદાચિ-
ન્માયા સઞ્જાયમાના ત્રિગુણમુખગણવ્યક્તશક્તિસ્વભાવા ।
સિદ્ધાન્તૈર્ભિન્નમાનપ્રમિતિભિરસુખૈર્ભેદબુદ્ધિપ્રધાનૈઃ
સંસારિત્વં પ્રસાર્ય દૃઢયતિ ભવતઃ સત્યતાં વેદવિદ્યા ॥ ૩॥

અન્યઃ પક્ષોઽથવાત્ર પ્રવિમલકલનાનન્તશક્તિપ્રકાશઃ
સત્યાખ્યઃ સોઽપિ યત્ર પ્રવિલયમયતે શૂન્યગર્તે તદાત્મા ।
યૌષ્માકઃ સત્યભાવઃ સ ચ નિજમહસાં કામરૂપાત્મમાયા-
મુત્પાદ્યૈતત્પ્રપઞ્ચં ઘટયતિ તદિદં વ્યશ્નુષે સ્વાત્મયોને ॥ ૪॥

ઐક્યાચ્છિચ્છક્તયોશ્ચેદિદમહમિતિ ચ દ્વન્દ્વભાવસ્ય જીવ-
બ્રહ્માદિદ્વૈતબુદ્ધ્યોર્દિનકરશશિનોરણ્ડવિધ્યણ્ડયોશ્ચ ।
પ્રાણાપાનાખ્યવાય્વોઃ સુકૃતદુરિતયોઃ સ્યાદ્યદા સામરસ્ય-
પ્રાદુર્ભાવસ્તદા ત્વં ભવસિ સદસદાનન્દનાથઃ પરોઽગ્રે ॥ ૫॥

સેયં વિજ્ઞાનશક્તિસ્તવ શિવગુરુણા દર્શિતા નિત્યશુદ્ધા
નિર્દ્વન્દ્વબ્રહ્મતત્ત્વં ગમયતિ સુધિયાં સચ્ચિદાનન્દપૂર્ણમ્ ।
લોકે મેયપ્રમાતૃપ્રમિતિભિરિતિ ચેદર્થિતા ભિન્નમાર્ગાઃ
મુદ્રા નાનાસ્વરૂપાઃ પ્રકટયતિ મુદાહઙ્કૃતિસ્થાઃ પરેશ ॥ ૬॥

ઇતિ શ્રીદૂર્વાસકૃતપરશમ્ભુમહિમ્નસ્તવે
જ્ઞાનશક્તિસ્કન્ધરશ્મિપ્રકરણં ચતુર્થમ્ ॥ ૪॥

---

## ૫. પઞ્ચમ પ્રકરણં ક્રિયાશક્તિસ્કન્ધરશ્મિ

બુદ્ધિજ્ઞાનેન્દ્રિયાણાં નિજનિજવિષયાસ્વાદભોગપ્રબોધ-
ક્ષીરાબ્ધિઃ પ્રોદ્યદિચ્છામૃતકરણરુચા વાઙ્મુખક્ષાલિતૈશ્ચ ।
સઙ્ક્રાન્તશ્ચાલિતાર્થપ્રસરબહુપથઃ સ્વાત્મમાયોરુપૂર-
ત્રુટ્યદ્બ્રહ્માણ્ડબિન્દૂન્વિકિરતિ તવ ચેત્ત્વં શિવાતઃ ક્રિયાત્મા ॥ ૧॥

સૃષ્ટિસ્થિત્યન્તલીલાવકલિતસરણિર્યત્પ્રયત્નો યદીયં
ધૈર્યં વિખ્યાતવીર્યં સકલમિતિ ગતા યસ્ય બુદ્ધિઃ સમૃદ્ધા ।
યત્સામર્થ્યં પ્રભૂતં નિરવધિગણનાજાણ્ડરુદ્રાણ્ડભાણ્ડા-
ગારં યદ્બ્રહ્મસત્તા જયતિ તવ મનોરૂપવિશ્વાત્મકત્વમ્ ॥ ૨॥

સંવેશં દૂરદેશં કલયતિ સકલં કર્મકૃત્યં ચ તત્ત્વં
    સ્વં યદ્વાહ્યેન્દ્રિયાણાં ચલનમપિ વિના સ્વાન્તમન્તઃપ્રકાશમ્ ।
તત્તે વીર સ્વતન્ત્રપ્રકૃતિનિગમનં નિર્ગતોપાધિતર્કં
    બાહ્યાખ્યાદર્શનાર્થં વિમલશિવ તતસ્ત્વં હૃષીકાશ્રયાત્મા ॥ ૩॥

યદ્વન્ન્યગ્રોધબીજં પૃથુતરવિટપાનોકહત્વેન રૂઢં
    સામર્થ્યં દર્શયેસ્ત્વં પરમશિવ સદા સત્યવિજ્ઞાનબીજમ્ ।
ઇચ્છાક્ષેત્રે સુબુદ્ધીન્દ્રિયકુલકલિતં સર્વતઃ સ્વક્રિયાભિઃ
    સ્વાત્માનં વિશ્વરૂપં પ્રકટયસિ યદા ત્વં તદા ગોચરઃ સ્યાઃ ॥ ૪॥

સ્વાત્માશેષાક્ષવૃત્તેઃ પૃથગયનતયા ક્વાપિ ભૂતાનિ પઞ્ચ
    ક્વાપિ પ્રેક્ષાપ્રપઞ્ચઃ ક્વ ચ નિનદમુખાઃ ક્વાપિ વાક્યાદયશ્ચ ।
એતૈરેવ પ્રવૃત્તો નિજવિષયતયા સર્વવિશ્વાત્મજૃમ્ભ-
    સ્તસ્માત્ત્વં લોકમુખ્યોઽદ્વયમિતિ રહિતઃ સ્વપ્રકાશપ્રમેયઃ ॥ ૫॥

કાલાવસ્થાશ્ચ તિસ્રો ગિરિશ દશ દિશઃ સપ્તધા ભૂમિરાપો
    નાના તેજઃ સમીરા દશ વિયદખિલવ્યાપિ ચૈકાદશાક્ષાઃ ।
ભિન્નાર્થાનન્તબોધપ્રકટિતમહિમા બીજભેદાસ્ત્વનન્તા-
    સ્ત્વત્સક્તા બીજજાતાઃ સ્વગુણમનુસરન્ત્યેવ તે દેવ સત્ત્વાત્ ॥ ૬॥

પઞ્ચાશદ્વર્ણમાલા બહુવિધનિનદોચ્ચારણાત્તત્ત્વજાલ-
    વ્યક્તિવ્યાપારસક્તા ગિરિશ ગુરુમુખામ્નાયવિદ્યાસ્વરૂપા ।
ધાત્રાદ્યુત્પત્તિપૂર્વં શ્રુતિમુખવિવિધાનેકસિદ્ધાન્તવિદ્યા
    નાનાભાષાક્રિયાભિઃ પ્રકટયતિ તતઃ સૈવ તે સાઙ્ગવેદાન્ ॥ ૭॥

વર્ણેભ્યો ધાતવઃ સ્યુર્વિવિધપદચયસ્તદ્ભવસ્તેન વાક્યં
    તસ્માજ્જાતં પ્રમાણં વિવિધનિગમનં તેન સિદ્ધાન્તજાલમ્ ।
તસ્માન્નાનાત્મતત્ત્વપ્રકટનમિતિ યત્તત્ત્વવિદ્યા ત્વદીયા
    ત્વં ચેદેકોઽદ્વિતીયઃ ક્રમરહિતમહાસંવિદાત્મા મહેશઃ ॥ ૮॥

યજ્ઞસ્થાનં શ્મશાનં સકલમિતિ ગૃહં ભાસ્વદોઙ્કારપીઠં
    પ્રાદુર્ભૂતપ્રયાણસ્થલમિતિ વિપુલં કલ્પવૃક્ષાધિરૂઢૈઃ ।
સંવીતૈર્ભૈરવૈશ્ચોરગપતિગણપૈસ્તત્ર દિવ્યાર્ઘ્યપાત્રં
    વહ્નિબધ્નેન્દુક્લૃપ્તં પરશિવ સકલં વ્યશ્નુષે સ્વાત્મના ત્વમ્ ॥ ૯॥

ચિત્પૂજા દૃક્ક્રિયાત્મા ગુરુકથિતમહારુદ્રમૂર્તિઃ સમન્તા-
    દાત્મીયૈરઙ્ગદેવૈરધિગતવિષયાજ્યાહુતિર્નિર્વિકલ્પઃ ।

નિષ્કામૈરાત્મકામૈરુપચિતયજનશ્ચિત્સ્વતન્ત્રૈરતન્દ્રૈ-
રાત્માગ્નૌ બ્રહ્મવિદ્યાપરિણતમતિભિઃ શ્રીવિભો હૂયસે ત્વમ્ ॥ ૧૦॥

દ્વૈતં યત્રાનઘેધ્મં પશુરધિપિશિતો મૃત્યુરક્ષાણિ જિહ્વા-
હવ્યં ચાથ પ્રબોધઃ પ્રકટહુતવહો નિર્મલાત્મૈવ હોતા ।
અધ્વર્યુઃ સ્વચ્છચેતો ગુરુમુખવિદિતા માતૃકોદ્ગાતૃવર્ગઃ
સ્વાચાર્યો દેશિકેન્દ્રઃ પરમખમુગસિ ત્વં પરઃ શમ્ભુરીશઃ ॥ ૧૧॥

યાગાશ્ચાન્યે સકામૈઃ પશુભિરિહ કૃતાઃ સર્વસિદ્ધાન્તકૃત્યાઃ
નાનાયજ્ઞક્રિયાશ્ચ ત્રિભુવનભવને ચિત્રકર્મપ્રસારાઃ ।
વિશ્વોત્પત્તિપ્રતિષ્ઠાપ્રહરણવિધયઃ સ્વક્રિયાશક્તિબીજાઃ
સઞ્જાતાઃ સર્વતસ્ત્વં પ્રભવસિ મનસા ચિત્રનિર્માણમૂર્તે ॥ ૧૨॥

ઇતિ શ્રીદૂર્વાસકૃતપરશમ્ભુમહિમ્નસ્તવે
ક્રિયાશક્તિસ્કન્ધરશ્મિપ્રકરણં પઞ્ચમમ્ ॥ ૫॥

૬. ષષ્ઠં પ્રકરણં કુણ્ડલિનીશક્તિસ્કન્ધરશ્મિ

નિત્યા લુપ્તાત્મશક્તિઃ સકલતિથિકૃણાપઞ્ચદશ્યા પ્રદીપ્ત-
સ્ત્રુટ્યાદીન્કાલવાયૂન્ગ્રસદુરુરસનશ્ચક્રવલ્મીકવર્તી ।
સમ્યક્ ચૈતન્યગુમ્ફૈરવગતકિરણો વિશ્વજૃમ્ભૈકભર્તા
કૃષ્ણાધ્વાર્કેન્દુયોનિર્ભુજગપતિતનુસ્ત્વં તતઃ કુણ્ડલીશઃ ॥ ૧॥

સ્વસ્થાત્મા ચિત્તપૂર્વં રવિશશિપદવીં પૂરિતાંશુપ્રચારાં
દીપાન્તર્વહ્નિવેધૈરવિતતગતિભિર્બોધિતાધારશક્તિમ્ ।
તત્તચ્ચક્રપ્રભેદોદ્ભવવિવિધમહાશબ્દરૂપામનન્ત-
બ્રહ્માનન્દપ્રવાહામનુભવસિ પરામાદિસૌષુમ્ણમૂર્તે ॥ ૨॥

યસ્માત્પ્રાણઃ પ્રરોહત્યુપરિગતિરધઃ સમ્પ્રધાવત્યપાન-
સ્તસ્માદેવાવિરોધાત્તદુભયજનિકૃદ્વાયુસંરોધમાત્રાત્ ।
વિદ્યાવિદ્યાદિયુગ્મપ્રસરસમરસામ્ભોધિજૃમ્ભૈરદમ્ભૈઃ
સાર્ધં હંસઃ પરસ્મિન્મહસિ ખલુ લયં પ્રૈતિ તે પ્રાણસૂત્રઃ ॥ ૩॥

સર્વેષામિન્દ્રિયાણાં નિજનિજવિષયોદ્યોતનં યત્પ્રસૂતં
સારાઃ સર્વેષુ કર્મસ્વનુપમવિષયાઃ સાધ્વસાનન્દકોપાઃ ।
યજ્જાતાઃ સર્વનાડીપથચલદનિલવ્યાપ્તયઃ સર્વભાવાઃ
નાનારૂપાશ્ચ સર્વાયનપથિકમહાસ્પન્દકઃ સ ત્વમેવ ॥ ૪॥

બુદ્ધ્વા સદ્દેશિકોક્ત્યા સુવિદિતવિભવાં ખેચરીં દિવ્યમુદ્રા-
મર્થાનન્તપ્રપઞ્ચાન્વિતનિજકરણાન્યાત્મચિત્તે નિરુધ્ય ।
તચ્ચિત્તં જ્યોતિરઙ્ગં નિરવધિકરણં ચિન્તયેદ્યઃ સ યોગી
નિર્વાણઃ કૃષ્ણવર્ત્મા ભવતિ તવ મહાસ્પન્દતામેત્ય શમ્ભો ॥ ૫॥

પ્રાણાખ્યા કુણ્ડલિન્યા જગદિદમખિલં પ્રાણિતં તે યયેશ
જ્ઞાત્વા યાં યોગિનસ્તે પરતરમભયં યાન્તિ શાન્તં પદં તત્ ।
યામજ્ઞાત્વા ભવાબ્ધૌ જનનમરણકૃત્ક્રૂરકર્મપ્રબદ્ધા
મજ્જન્ત્યાદ્યન્તહીના યદિ કૃપયતિ સા મોચયેન્મૃત્યુબન્ધાત્ ॥ ૬॥

ઇતિ શ્રીદૂર્વાસકૃતપરશમ્ભુમહિમ્નસ્તવે
કુણ્ડલિનીશક્તિસ્કન્ધરશ્મિપ્રકરણં ષષ્ઠમ્ ॥ ૬॥

---

૭. સપ્તમં પ્રકરણં માતૃકાશક્તિસ્કન્ધરશ્મિ

અજ્ઞાતં બ્રહ્મતત્ત્વં નિજહૃદયદરીલીનમાત્મપ્રકાશં
વ્યક્તીકર્તું સ્વનિત્યાક્ષરવિદિતમહામાતૃકાત્વં પ્રપન્નઃ ।
ત્વં દિવ્યામ્નાયવિદ્યા સુવિદિતમહિમાનન્તશક્તિપ્રકાશ-
સ્તત્તદ્વર્ણાત્મભેદૈરુપદિશસિ પદં શ્રીગુરો સ્વસ્વરૂપમ્ ॥ ૧॥

શ્રીશબ્દબ્રહ્મમૂર્તે સકલરવમયાનાહતધ્વાનભેદા-
નાત્મીયાનક્ષરસ્થાન્બહુવિધનિનદૈર્ભૂરિવાદ્યપ્રભેદૈઃ ।
ભેરીનિઃ સાણઘણ્ટાદરમુરજમહાશૃઙ્ગનાલોરુતાલૈ-
ર્વંશૈર્યન્ત્રૈશ્ચ ગાત્રૈર્જલધરપટલૈસ્ત્વં બ્રવીષિ ધ્વનિજ્ઞઃ ॥ ૨॥

તત્ત્વાનાં વ્યક્તિહેતુઃ સકલતિથિગતઃ સપ્તપુર્યષ્ટકાઙ્ગ-
સ્ત્રીપુંસદ્વન્દ્વરૂપો દ્યુમણિશશિમહાવહ્નિપાદઃ ષડાત્મા ।
સર્વાભિપ્રાયસંવિત્પ્રકટિતવિભવસ્ત્વં મહામ્નાયવિદ્યા-
સારસ્ફારસ્વરૂપઃ પુરુષ ઇતિ તતઃ સોઽક્ષરાત્માદિવર્ણઃ ॥ ૩॥

રમ્યોદાત્તાનુદાત્તસ્વરિતવિકૃતિગઃ પ્રોચ્ચનીચોભયસ્થો
ભેદાદષ્ટાદશાત્મા મહિતનિજમહાસ્ફૂર્તિરેકોઽક્ષરાદિઃ ।
ષડ્જાદિગ્રામજાતશ્રુતિવિતતલસદ્ગીતસપ્તસ્વરોઘ-
ન્નાનારાગાન્પ્રબન્ધાનધિવસતિ ભવાનાદિનિત્યસ્વરાત્મન્ ॥ ૪॥

સર્વાસ્યસ્થાનવર્ણઃ પ્રથમવિગણિતસ્ત્વં સ્તુતઃ ષોડશીતિ

સ્વેચ્છાશક્ત્યા નિરૂઢદ્રઢિમનિજમહાપ્રૌઢિમાઢૌકમાનઃ ।
કાલવ્યક્તસ્ત્રિલિઙ્ગિન્નિજગતિવિલયાન્હ્રસ્વદીર્ઘપ્લુતાદીન્
વિદ્યાવિદ્યોભયાત્મા જનયસિ પરિતઃ શ્રીમહાવર્ણજાત્મન્ ॥ ૫॥

પક્ષદ્વન્દ્વૈકકર્તાવનિજલહુતભુઙ્મારુતાકાશમૂર્તે
શ્રોત્રાદ્યક્ષાણિ સર્વાણ્યધિગતચરણઃ સ્વપ્રકૃત્યા નિબદ્ધઃ ।
અન્તસ્થો વિશ્વરૂપઃ પુરુષ ઇતિ યતો જ્ઞાયસે સ્વક્રમેણ
જ્ઞાતા વર્ગાક્ષરાણાં પરમશિવ જનૈસ્ત્વં તતો વર્ગજોઽસિ ॥ ૬॥

સર્વાતીતાત્મધામાનલનિલયપદજ્ઞાપિકા મન્ત્રવિદ્યાઃ
સત્યાભિપ્રાયબુદ્ધ્યા શિવગુરુવદનામ્ભોરુહાદ્ભાસમાનાઃ ॥

નાનાર્થા ધાતવશ્ચ પ્રકટિતવિભવાશ્ચિત્રવાગ્બ્રહ્મવેદાઃ
સર્વં નશ્યદ્વિના ત્વાં પરશિવ સહજં વર્ણસંયોગરૂપમ્ ॥ ૭॥

ઓઙ્કારં સ્વાત્મવાસ શ્રુતિભિરભિનુતં વાગ્ભવં શક્તિબીજં
માબીજં સ્મારબીજં પરતરવિભવં માતૃકાબીજયુગ્મમ્ ।
શૈવાન્ત્ય ચાપિ ગત્વા ષડયનવિલસત્કૂટષટ્કં ચ ભિત્વા
હંસઃ સોઽહં તથા ત્વં વિરમસિ મનસામન્તરે મન્ત્રમૂર્તે ॥ ૮॥

બિન્દ્વેન્દોરૂર્ધ્વનાદૈરવકલિતકલાવ્યાપ્તિભિઃ સાધિદેવૈ-
ર્નાનાનન્તાધિદેવૈઃ પરિણતિસુલભૈઃ શ્રીગુરૂક્તાગમસ્થૈઃ ।
ન્યાસૈર્વિદ્યાવિશેષૈઃ શ્રુતિમુખવિવિધાનેકસિદ્ધાન્તમન્ત્રૈઃ
વિષ્વક્પ્રોતપ્રતીકો દહસિ ભવમઘં દુષ્પ્રભામન્ત્રવહ્નૌ ॥ ૯॥

વર્ણાસ્તે મન્ત્રવિદ્યા દશવિકરણગા ધાતવો નિત્યશબ્દાઃ
વાક્યાન્યામ્નાયભેદા બહુવિધમતજાઃ સાઙ્ગવેદાશ્ચ ભાષાઃ ।
નાનાચ્છન્દાંસિ તાલાઃ સ્વરવિકૃતિગુણાઃ સર્વતો વાઙ્મયસ્થાઃ
નાનારૂપાઃ પરાગ્નેઃ સમજનિષત તે માતૃકાશક્તિબીજાત્ ॥ ૧૦॥

ઇતિ શ્રીદૂર્વાસકૃતપરશમ્ભુમહિમ્નસ્તવે
માતૃકાશક્તિસ્કન્ધરશ્મિપ્રકરણં સપ્તમમ્ ॥ ૭॥

---

૮. અષ્ટમં પ્રકરણં ષડન્વયરશ્મિવિવેકસ્કન્ધ

એવં રાત્રિન્દિવસ્થાઃ પરશિવઘટિકા એવ તે રશ્મિભૂતાઃ
સ્ત્રીપુંસદ્વન્દ્વરૂપા રવિશશિચરણાક્રાન્તયો રક્તશુક્લાઃ ।

ષટ્છક્ત્યંશપ્રભેદા દહરપુરયુગે કોણષટ્કાન્તરસ્થાઃ
    કાલાવસ્થાશ્ચતુર્ભિઃ પ્રવિદધતિ યુગૈર્વિશ્વભૂતૈર્નિદાનૈઃ ॥ ૧॥

ષટ્ત્રિંશત્તત્ત્વમાલામવનિમુખશિવાન્તામુપેતાત્મવૃત્તિં
    ખે વાયૌ સપ્તવિંશત્યુડુગણવિકૃતીર્જીવમાયા શિવાંશાત્ ।
તેજસ્થાઃ સ્વાન્તરાત્માન્તરતનુવિકૃતીરસ્થિમાંસપ્રમુખ્યાઃ
    ક્ષોણ્યા ત્વં જીવમાયાગુણગણમભિતો ભાસયસ્યંશુમાલિન્ ॥ ૨॥

યાવન્તસ્થે મયૂખાઃ ક્ષિતિજલદહનસ્પર્શનાકાશચેતઃ
    પીઠસ્થાઃ ષટ્પ્રમાણાઃ પરમધિપતયો ભૈરવા એવ સર્વે ।
તેષાં મધ્યે ત્વમેકઃ પરતરમહિમોજ્જૃમ્ભમાણઃ પ્રચણ્ડો
    માર્તણ્ડો રશ્મિમધ્યસ્થિત ઇવ પરિતો ભાસિ ચિદ્ભૈરવાગ્રે ॥ ૩॥

ભૈરવ્યો રશ્મિદેવ્યસ્તવ શિવ કરુણાપૂરિતાક્ષાઃ પ્રસન્ના-
    સ્ત્વત્સત્તાકાશવાહોદિતનિજગતયશ્ચર્વિતાત્માર્થકૃત્યાઃ ।
તદ્ધામન્યેવ શાન્તાઃ સુરમુનિપિતૃભિઃ પુણ્યપાપૈશ્ચ બદ્ધાન્
    ભક્તાંશ્ચાનેકબાધાગ્ઝટિતિ વિઘટયન્ત્યાત્મબોધાગ્નિજૃમ્ભૈઃ ॥ ૪॥

શ્રીનાથ શ્રીપરેશેશ્વર પરશિવ તે દિવ્યદિવ્યા મરીચી-
    ર્બ્રહ્માદીનાં મનોવાગનવગતમહાચિત્રનાનાર્થરૂઢાઃ ।
ગૂઢપ્રૌઢપ્રકાશાઃ સુરમુનિવચનૈરપ્યબુદ્ધાઃ કથં વા
    સ્તોતું જ્ઞાતું સમર્થો ભવતિ કવિજનઃ કોઽત્ર મન્દો નૃમાત્રઃ ॥ ૫॥

ઇતિ શ્રીદૂર્વાસકૃતપરશમ્ભુમહિમ્નસ્તવે
સાધારણ્યેન ષડન્વયરશ્મિવિવેકસ્કન્ધપ્રકરણમષ્ટમમ્ ॥ ૮॥

---

૯. નવમં પ્રકરણં પાવકધ્યાનયોગ

સાઙ્ગા ભૂમિઃ શતાઙ્ગઃ શતધૃતિરપિ તત્સારથિઃ સપ્તયસ્તે
    વેદા બ્રહ્મૈકવેદ્યાઃ પૃથુતરચરણૌ પુષ્પવન્તૌ તદક્ષઃ ।
મરુસ્તત્કીલબન્ધઃ કમઠપતિરિભાસ્તત્પૃથુસ્તમ્ભપઙ્ક્તિઃ
    શેષસ્તદ્રજ્જુબન્ધસ્તદુપરિ પિતૃભૂસ્તત્ર ચિન્ત્યો રથી ત્વમ્ ॥ ૧॥

કલ્પાન્તાનન્તસૂર્યદ્યુતિમતિ વિકટાનેકદંષ્ટ્રં ષડાસ્યં
    વહ્નીન્દ્રર્કામ્બુકાષ્ઠાદશયુતમભિતઃ પ્રજ્વલન્તં મયૂખૈઃ ।
શૂલાસીષૂગ્રશક્ત્યઙ્કુશવરનૃશિરઃ શ્રીફલેષ્વાસનારિ
    દ્યોતત્પાશાભયાઙ્કૈર્નિજભુજપરિઘૈસ્ત્વાં ગુરું શમ્ભુમીડે ॥ ૨॥

નાગાસ્થીન્દુપ્રસૂતૈઃ શ્રવણગતમહાભૂષણૈઃ કુણ્ડલીન્દ્રૈ-
    રાક્રોશન્મુણ્ડમાલાપરિવૃતવપુષા દિક્ષુ જાજ્વલ્યમાનમ્ ।
મત્તેભેન્દ્રોરુકૃત્ત્યન્તરઘટિતકટીમણ્ડલં સાટ્ટહાસં
    તં ભાસ્વદ્વ્યોમગર્ભોદરવિધૃતકરાઙ્ગુષ્ઠમાત્રં પ્રપદ્યે ॥ ૩॥

નાગેન્દ્રૈઃ કલ્પવૃક્ષૈરધિગતવિહગૈર્ભૈરવૈર્દેવદૈત્યૈઃ
    ભૂતૈઃ પ્રેતૈઃ પિશાચૈઃ પરિવૃતમભિતો યોગિનીભિઃ શ્મશાને ।
સર્વપ્રજ્ઞૈકવાસં ત્રિભુવનનિલયં સ્વાત્મનાધ્યાત્મદીપ્તં
    સર્વોત્તીર્ણાત્મતત્ત્વેશ્વરમનલમુખં ત્વાં ગુરું શમ્ભુમીડે ॥ ૪॥

નાનાધ્યાનાત્મયોગપ્રકટિતશિવતાસિદ્ધરૂપપ્રસાદઃ
    સ્વેચ્છાજ્ઞાનક્રિયાત્મત્રિશિખવિદલિતત્ર્યુદીર્ણપ્રમોહઃ ।
સત્યજ્ઞાનાસિભિન્નપ્રમિતિજનિરિપુઃ સ્વાત્મયોગેષુ ધારા-
    ચ્છિન્નાવિદ્યાસુ લક્ષ્યઃ પરમશિવ વિભો તેન મૃત્યુઞ્જયસ્ત્વમ્ ॥ ૫॥

દેવ બ્રહ્માણ્ડસૃષ્ટિસ્થિતિલયસમયધ્વંસિની તે ત્રિશક્તિ-
    ર્માયાશક્તિપ્રચણ્ડોદ્ધતઘનકરિણી વારિણી સા સૃણિસ્તે ।
ધર્માર્થાત્મેષ્ટમુક્તિપ્રવિતરણચણસ્તે વરસ્તેઽપ્યભીતિ-
    ર્વિશ્વગ્રાસોગ્રમૃત્યુપ્રતિભયદલિની તદ્ભવાન્મૃત્યુમૃત્યુઃ ॥ ૬॥

પાશસ્તે વિશ્વવશ્યઃ પિતૃપતિકૃતભિર્હસ્તિની-સિંહવૃત્તિ-
    શ્ચક્રઃ સંસારરાત્રિદ્યુમણિસમુદયસ્તાવકસ્તે પિનાકઃ ।
આક્રાન્તાશેષમોહપ્રકૃતિવિકૃતિમહામાતૃકાચિત્પરાત્મા
    પ્રાણાસ્તે તત્કપાલં હતવિધિમુખસત્પ્રેતચિદ્રૂપમીશ ॥ ૭॥

એવં તે દિવ્યદિવ્યાયુધપરમહિમા ગીયતે વેદશાસ્ત્રૈઃ
    પ્રાગુક્તસ્તે શતાઙ્ગોઽપ્યપિ ચ પિતૃગણપ્રેતશીર્ષોચ્ચરઙ્ગે ।
ઉચ્ચણ્ડં તાણ્ડવં તે ત્રિભુવનભયકૃદ્ધ્વજપાતાટ્ટહાસો
    ભીષાસ્માત્ત્વત્સકાશાદપાર ઇવ પરો નાસ્તિ તેનોગ્રવીરઃ ॥ ૮॥

ચિત્તાકાશાનિલાગ્ન્યમ્બ્વવનિતલપતિપ્રેતસિંહાસનસ્થઃ
    ષટ્ચ્છક્તિવ્યક્તમૂર્તિઃ ષડયનપથિકઃ સોમસૂર્યાગ્નિપાદઃ ।
બ્રહ્માગ્નિઃ સપ્તજિહ્વાકબલિતવિષયીભૂતવિશ્વપ્રપઞ્ચ-
    સ્થૂલોઽપિ ધ્યાનદૃષ્ટેસ્ત્વમધિકતમસાં જ્યોતિષામપ્યગમ્યઃ ॥ ૯॥

ઇત્યુક્તધ્યાનચિન્ત્યોઽપ્યનવગતમનોવાક્પ્રવૃત્તિસ્વભાવઃ

સ્વચ્છન્દાત્મીયસત્તા ચિદુચિતવિભવઃ પાવકઃ શમ્ભુરૂપઃ ।
સર્વાતીતસ્વભાવોઽપ્યુપનિષદુદિતજ્ઞાનમીમાંસ્યમાનઃ
સત્વં યસ્યાન્તરઙ્ગે નિવસસિ સ શિવસ્ત્વન્મયઃ સ્યાન્મહેશ ॥ ૧૦॥

શ્રીમાનપ્યાદિભિક્ષુસ્ત્રિભુવનજનકોઽપ્યાત્મભૂરાગમોક્તિ-
વ્યાખ્યાવેદ્યોઽપ્યવાચઃ પ્રકૃતિસુવિમલોઽપ્યાત્મમાયાવિલાસઃ ।
તત્ત્વાદેકોઽપ્યનેકઃ પરયુવતિરતોઽપ્યાત્મવિત્સેવ્યમાનઃ
તસ્માત્સ્વચ્છન્દલીલસ્ત્વમિહ વિજયસે માનસીં ભાવવૃત્તિમ્ ॥ ૧૧॥

ઇતિ શ્રીદૂર્વાસકૃતપરશમ્ભુમહિમ્નસ્તવે પાવકધ્યાનયોગપ્રકરણં
નવમમ્ ॥ ૯॥

---

૧૦. દશમં પ્રકરણં મહાવિભૂતિ

દ્રષ્ટવ્યસ્ત્વં જગદ્ભિર્બહુવિધવિધિભિઃ સર્વસિદ્ધાન્તવાક્યૈઃ
શ્રોતવ્યો નિર્વિકલ્પઃ શિવગુરુવદનામ્ભોરુહેણ પ્રબુદ્ધઃ ।
મન્તવ્યઃ સર્વતત્ત્વાવકલિતચરણસ્તન્નિદધ્યાસિતવ્યઃ
સત્તામાનાવલમ્બીત્યમરનુતપદો નાસ્તિ દેવસ્ત્વદન્ય ॥ ૧॥

ઉગ્રં શાન્તં ચ વીરં સકલમયમહાવિષ્ણુમગ્નિં જ્વલન્તં
સર્વત્રાનન્તવક્ત્રં નરમૃગવપુષં ભીષણં સર્વભદ્રમ્ ।
સર્વજ્ઞં મૃત્યુમૃત્યું બહુવિધનુતિભિર્વન્દિતં સર્વલોકૈઃ
વિશ્વાહઙ્કારજૃમ્ભં પરમશિવ ગુરું ત્વાં ભજે મન્ત્રરાજમ્ ॥ ૨॥

શમ્ભો ત્વાં ભૂર્ભુવઃસ્વર્મહરુદિતતનું ત્વન્તરિક્ષદ્યુસૂર્યા-
રજ્ઞાચાર્યેન્દુશુક્રાર્કિભિરપિ નિગમબ્રહ્મભિઃ પ્રોતશક્તિમ્ ।
પ્રાણાપાનાદિભેદૈઃ કલયતિ સકલં માનસં ધ્યાનયોગં
યેષાં તેષાં સપર્યા ભવતિ સુરકૃતબ્રહ્મતા યોગિતા ચ ॥ ૩॥

સર્વોત્કૃષ્ટં પરં તત્સવિતુરનુપમં તે વરેણ્યં શરણ્યં
ભર્ગો દેવસ્ય ધીમહ્યભિદધતિ ધિયો યો ન ઇત્યૌર્વતેજઃ ।
તુર્યં સર્વાણિભૂતાન્યધિગતમમલં સર્વતો દૃક્ક્રમાદ્યં
ધ્યાયામિ ધ્યેયમન્તઃકરણસુનિયતૈર્યોગિભિઃ શ્રીમહેશ ॥ ૪॥

કાલોઽનન્તો યુગાત્મા શિવ દિવસનિશાપક્ષમાસાસ્તથાબ્દાઃ
તદ્ભેદાઃ ષડૃતુસ્થાસ્તદનુગતજગત્સર્વવૃત્તાન્તભેદાઃ ।
નાનાયજ્ઞક્રિયાશ્ચ ત્રિદશદિતિસુતા માનુષાઃ સર્વનાગાઃ

યોગીન્દ્રા જીવસઙ્ઘાસ્તવ ચરણબિલં યાન્તિ જન્માન્તમધ્યાત્ ॥ ૫॥

ભૂતં ભવ્યં ભવિષ્યત્રિભુવનભવને ષણ્મહાશક્તિભિસ્ત્વં
તત્સર્વં વ્યશ્નુવાનો વિચરસિ કલિતઃ સૃષ્ટિગત્યન્તકામૈઃ ।
દેવૈર્દૈત્યૈર્મનુષ્યૈરુરગપતિકુલૈઃ સર્વજીવપ્રસારૈ-
રાત્મીયૈશ્ચિત્રિતાઙ્ગઃ શિવ ભવતમસઃ સૂર્યભાસ્ત્વં પરસ્તાત્ ॥ ૬॥

શ્રોતા સ્પર્શી નિજરસરસિકઃ સર્વગન્ધાન્તરજ્ઞો
વક્તા કર્તા ચ ગન્તા ત્રિભુવન ભવતો વિશ્વસર્ગઃ પ્રમોદી ।
કામી મીમાંસકશ્ચ પ્રથિતશુચિશિખાસપ્તકવ્યાપ્તવિશ્વો
બોદ્ધા સ્વાર્થાનનન્તાનધિગતચરણઃ સર્વતસ્ત્વં શિવોઽસિ ॥ ૭॥

સર્વાર્થી સર્વનામા સકલકુલપતિઃ સર્વલોકાઙ્ગનેશઃ
શૃઙ્ગારી સર્વભોગી નવરસરરસિકઃ પ્રાજ્યસામ્રાજ્યભોક્તા ।
ત્રૈલોક્યે વાક્પ્રપઞ્ચે પ્રવચનપઠિતઃ સોમયાજી ચ યજ્ઞઃ
સંસારી કામચારીત્યનુવદતિ જનો યઃ સ ધન્યઃ શિવ ત્વામ્ ॥ ૮॥

ક્ષેત્રં ક્ષેત્રપ્રમાતા શિવગુરુવદનાઘોરવિદ્યાધિદેવો
મન્ત્રો મન્ત્રાધિદેવો મખવિધિરનઘો યોગયોગ્યઃ પદાર્થઃ ।
ત્વં દર્શઃ પૂર્ણમાસઃ પરિધિરપિ મખાચાર્યવર્યશ્ચ હોતો-
દ્ગાતાધ્વર્યુશ્ચ હવ્યં ત્રિવિધહુતવહસ્ત્વાં વિના નાસ્તિ શમ્ભો ॥ ૯॥

ક્ષેત્રજ્ઞાઃ સર્વદેવાઃ સુરનરભુજગાઃ સર્વજીવાશ્ચ તચ્ચ
ક્ષેત્રં બ્રહ્માણ્ડરૂપં ત્રિભુવનભુવનવ્યાપકં ચિત્રરૂપમ્ ।
એતાવદ્વ્યાપ્ય તત્ર સ્થિતમખિલજગદ્ભક્તભોક્તારમગ્નિં
જ્ઞાત્વા ષટ્ચ્છક્તિભિસ્ત્વાં પરમશિવ મહામૃત્યુમત્યેતિ વિદ્વાન્ ॥ ૧૦॥

ઉક્તક્ષેત્રાધિદેવે પરતરપુરુષે ત્વય્યનન્તસ્વરૂપે
દિવ્યામ્નાયા ગુરૂક્તા નિજનિજનિયતિસ્ફૂર્તયઃ સર્વવેદાઃ ।
સાઙ્ગોપાઙ્ગાશ્ચ શાસ્ત્રાણ્યધિગતમહિમાન્યોન્યસિદ્ધાન્તવિદ્યા
ભાષા સ્વાર્થૈર્વિભાન્તિ ત્રિણયન ભવતો વિશ્વમૂર્તે પરઃ કઃ ॥ ૧૧॥

મૂલં વ્યોમૈવ વાયુજ્વલનજલધરા મધ્યમં યસ્ય શાખા
દેવાઃ પર્ણાનિ દૈત્યાઃ કિસલયનિચયાઃ માનુષાશ્ચ પ્રતાનાઃ ।
નાગાઃ પુષ્પાણિ જીવા બહુવિધતનવો પક્વસસ્યપ્રબોધો
વિશ્વન્યગ્રોધકદ્રોઃ પરમશિવ ભવાન્ બીજભૂતો વિભાતિ ॥ ૧૨॥

માયારૂપેણ કાલો જનનમરણકૃત્સર્વજીવાઙ્ગવૃત્તે-
    ર્વિદ્યારૂપેણ કાલાન્તક ઇતિ વિનુતઃ સ ત્વમેવાપરો ન ।
દેહાહઙ્કાર એવાન્તક ઇતિ ગુરુણા યઃ પ્રવિજ્ઞાય માયાં
    જાગર્ત્યાત્મપ્રબોધે શિવ તવ કૃપયા સોઽત્ર મૃત્યુઞ્જયઃ સ્યાત્ ॥ ૧૩॥

ત્વં નાથસ્ત્વં ગુરુસ્ત્વં પરપદજનિતામ્નાયવિદ્યાર્થકોશ-
    સ્ત્વં શમ્ભુસ્ત્વં પરેશઃ પરતરમહિમા ત્વે પરા ત્વં પરાગ્નિઃ ।
ત્વં ભાનુસ્ત્વં સુધાંષુસ્ત્વમપિ ચ જનની ત્વં પિતા ત્વં સુમિત્ર-
    સ્ત્વં ભ્રાતા બાન્ધવસ્ત્વં ત્વમસિ ધનનિધિસ્ત્વાં વિના નાસ્તિ મેઽન્યઃ ॥ ૧૪॥

શબ્દાર્થાધારભૂતં ત્રિભુવનજનકં સર્વતો દિક્સતત્ત્વં
    ત્રૈલોક્યસ્થાયિ લિઙ્ગત્રયવિદિતપદં સર્વતત્ત્વૈકવેદ્યમ્ ।
સર્વાનિર્વાચ્યસત્તાગતપરવિભવજ્યોતિરુજ્જૃમ્ભમાણં
    વ્યક્તીકૃત્યાત્મવર્ણૈઃ પ્રકટયસિ પરં તત્ત્વમાત્મીયમગ્રે ॥ ૧૫॥

ત્વં વિશ્વં વિશ્વહેતુર્વિરહિત કરણે વિશ્વકાર્યૈકકર્તા
    વિશ્વાતીતશ્ચ વિશ્વેશ્વર ઇતિ બહુધા નિશ્ચિતશ્ચાક્ષરજ્ઞૈઃ ।
અદ્વૈતાત્મપ્રબોધાનલબહુલશિખાચર્વિતત્મીયહવ્યઃ
    શ્રીશમ્ભો વિશ્વસત્તા પરતરવિયતિ પૈષિ નિર્વાણપૂજામ્ ॥ ૧૬॥

એવં યઃ સ્તૌતિ ભૂતિં ત્રિભુવનમહતીં વિષ્વગાશ્ચર્યચર્યા-
    મન્તર્બાહ્યાગમોક્તિપ્રવિનુતવિભવામાદિમધ્યાન્તહીનામ્ ।
સૌમ્યોગ્રાકારદેવાસુરનરભુજગાનેકજીવપ્રભેદો-
    ત્પત્તિસ્થિત્યન્તભૂમિઃ સ ભવતિ જગદાશ્ચર્યવાનેવ શમ્ભો ॥ ૧૭॥

ઇતિ શ્રીદૂર્વાસકૃતપરશમ્ભુમહિમ્નસ્તવે
મહાવિભૂતિપ્રકરણં દશમમ્ ॥ ૧૦॥

૧૧. એકાદશં પ્રકરણં અન્તર્યાગોપાચારપરામર્શ

કા પૂજા પૂજકઃ કઃ શિવગુરુરિતિ કઃ કો વિધિઃ કશ્ચ મન્ત્રઃ
    કિં પીઠં કિં પ્રસૂનં કિમમલસલિલં કેઽત્ર સર્વોપચારાઃ ।
નિર્દ્વન્દ્વસ્યાત્મનસ્તે દ્વયમિતિ રચિતં સર્વમેતત્કથં સ્યા-
    ત્સન્તોષાર્થે મહેશ ત્રિકરણવિમલજ્ઞાનપૂજાપ્રસન્નાઃ ॥ ૧॥

ત્રૈકાલ્યં સર્વતસ્તે સકલજગદિદં વ્યશ્નુવાનાત્મસત્તા-
    વિસ્ફૂર્તેરષ્ટમૂર્તેરખિલજનમનઃપ્રોચ્ચસિંહાસનસ્ય ।

કસ્માદાવાહનં સ્યાદ્બહિરિહ ચરિતં ક્વાસનં ચન્દ્રમૌલે-
    ર્માયા સંસારભાવો રચયતિ નિતરામાત્મભોગાય ભેદમ્ ॥ ૨॥

આધારોઽગ્નિઃ સુપાત્રં રવિરમૃતકલાનાયકઃ પૂર્ણમર્ઘં
    શક્તીશસ્ત્વં પ્રપૂજ્યઃ ષડવયવયુતસ્તત્ર પાત્રપ્રવર્ગે ।
પાદ્યં તે તર્પણં ચ પ્રભવતિ સમુદે બાહ્યયાગાર્ઘ્યપાત્રૈઃ
    સન્તુષ્ટઃ સ્યાઃ કથં ત્વં પરશિવ વિમલજ્ઞાનદુગ્ધાબ્ધિશાયિન્ ॥ ૩॥

ભાસ્વચ્ચન્દ્રાગ્નિબિમ્બોદિતવિમલશિવજ્ઞાનનિત્યપ્રમોદ-
    જ્ઞાનાનન્દપ્રવાહાસ્ત્રિગુણિતસરિતો મુખ્યનાડીત્રયસ્થાઃ ।
કાલિન્દીજહ્નુકન્યાન્તરસરિદભિધાસ્તે તનુસ્નાનકૃત્યે
    સૃષ્ટા હૃલ્લિઙ્ગમૂર્તેઃ કથમિતરજલૈઃ સ્યાત્તવ સ્નાનમત્ર ॥ ૪॥

લજ્જારાગાદિમાયાતિમિરદિનકરીભૂતચેતઃપ્રબોધ-
    જ્યોતિઃપુઞ્જપ્રવૃત્તેર્ગતભવતમસો દિક્પટાલઙ્કૃતસ્ય ।
પ્રજ્ઞાયજ્ઞોપવીતૈરુપચિતવપુષઃ પ્રેતભસ્માઙ્ગરાગ-
    સ્યાન્યે મિથ્યોપચારાસ્તવ વસનમહાસૂત્રબન્ધાનુલેપાઃ ॥ ૫॥

સર્વાહિંસેન્દ્રિયાશ્વદ્રુતગતિશમનં સર્વભૂતાનુકમ્પા-
    શાન્તિઃ સત્યં પ્રબોધો ગુરુકથિતતપો નિશ્ચલધ્યાનદૃષ્ટિઃ ।
શ્રદ્ધાભક્તિશ્ચ નિત્યં નિજવિષયપરિત્યાગિતા નિઃસ્પૃહત્વં
    સંવિત્પૂજ્યેતિ પુષ્પાણ્યમલ શિવ ભવત્પૂજનાય ક્રિયન્તે ॥ ૬॥

બ્રાહ્મ્યાદ્યા માતરોઽષ્ટૌ સ્વવિષયકુસુમૈરાત્મભાવપ્રસૂનૈઃ
    યોગિન્યઃ શક્તયસ્તે નિજનિજમહિમસ્ફૂર્તિસન્મઞ્જરીભિઃ ।
ત્વદ્ભાવં ભાવયદ્ભિસ્તવ કિરણમહાભૈરવૈરાત્તસઙ્ગા-
    સ્ત્વાં શ્રીચિદ્ભૈરવેશં પરમશિવગુરું પૂજયન્તિ સ્મરન્ત્યઃ ॥ ૭॥

સદ્વિદ્યાઙ્ગારમધ્યાર્પિતસતતમહાવાસનાભ્યાસધૂપૈઃ
    શ્રીમદ્વક્ત્રારવિન્દોદિતસકલકુલામ્નાયબોધપ્રદીપૈઃ ।
સર્વાક્ષાર્થાન્નભેદૈરુપરચિતમહાદિવ્યનૈવેદ્યપાનૈ-
    રારાધ્યો યોગિભિસ્ત્વં કથમિતરકૃતૈસ્તોષ્યસે શ્રીપરેશ ॥ ૮॥

ઇતિ શ્રીદૂર્વાસુકૃતપરશમ્ભુમહિમ્નસ્તવે
અન્તર્યાગોપાચારપરામર્શપ્રકરણમેકાદશમ્ ॥ ૧૧॥

૧૨. દ્વાદશં પ્રકરણં શાન્તિ

વિદ્યા નાનાવિભૂષા મૃગમદઘનસારાદિસૌરભ્યવસ્તુ-
પ્રોતશ્રીચન્દનાનિ પ્રવિકચકુસુમાન્યદ્ભુતાન્યમ્બરાણિ ।
નાનામોદાશ્ચ ધૂપાઃ ક્રમુકશકલવદ્વીટિકાઃ પાનભેદાઃ
નાનાપાત્રાણિ ભૂમ્યાઃ પરશિવ ભવતઃ પૂજનાય ક્રિયન્તે ॥ ૧॥

સપ્તૈતે મન્દલસ્થાશ્ચરુજલનિધયો દિવ્યનૈવેદ્યરાશી-
ન્નાનાપક્વાન્નભેદાન્વિવિધપિષિતવચ્છાકનાનોપદંષાન્ ।
ભક્ષ્યં ભોજ્યં ચ ચોષ્યં વિવિધશષિસુધાસ્વાદવદ્વસ્તુલેહ્યં
હાલાદધ્યાજ્યદુગ્ધાન્યપિ વિદધતિ તે સૂપહારાય શમ્ભો ॥ ૨॥

મન્ત્રાકારૈઃ પ્રદીપૈર્દહનરવિકલાનાથનક્ષત્રમાલા-
વિદ્યુન્માણિક્યમુક્તારજતકનકધાત્વાદિનાનાપ્રકાશૈઃ ।
યુષ્મન્નીરાજનાયૈ વિરચિતરચનઃ સ્વપ્રકાશાદિમૂર્તિ
સર્વાનન્દાત્મરૂપં પરમશિવગુરું ભાસયત્યૌર્વતેજાઃ ॥ ૩॥

મુદ્રા નાનાર્થપોષાનતિપથચલિતાનેષ્ટયોગાંશ્ચ નાટ્યં
તીર્થાક્રાન્તિં પ્રણામં નિજકરણગતિં સર્વસિદ્ધાન્તવાચઃ ।
કર્માજ્ઞાનપ્રવાહાન્વ્યજનમપિ મહાચામરાણ્યાતપત્રં
હસ્ત્યશ્વાદીન્રથાંસ્તે પરશિવચરણાધ્યાસ્ય દાસ્યં વિધત્તે ॥ ૪॥

આકાશઃ શબ્દભેદૈઃ પ્રલયજલધરામન્દદમ્ભોલિજૃમ્ભૈ-
ર્ભેરીનિઃસાણવાદ્યૈર્દરનિકરરવૈર્ભૂરિઘણ્ટાનિનાદૈઃ ।
તાલૈર્નાદૈર્મૃદઙ્ગૈર્મુરજડમરુકૈર્ગીતસદ્વલ્લકીભિઃ
સર્વૈર્વાદ્યપ્રભેદધ્વનિભિરિહ વિભો નાથ પૂજાં કરોતિ ॥ ૫॥

શામ્ભવ્યો રશ્મિદેવ્યઃ સમરસમુદિતા માતૃકાવર્ણરૂપા
ભાસ્વન્તો ભૈરવાષ્ટા અપિ સરસકલાપાનમત્તાઃ ક્રમસ્થાઃ ।
વેદાન્તૈરાગમાન્તૈરભિદધતિ પરં શામ્ભવં વૈભવં તે
સર્વાનિર્વાચ્યસત્તાવિયદુદિતપદં શ્રીવિભો વિશ્વમૂર્તે ॥ ૬॥

યોગિન્યઃ ક્ષેત્રપાલાઃ સરસમધુમદાવેદશાસ્ત્રાર્થતત્ત્વ-
વ્યાખ્યાનધ્યાનવક્ત્રાઃ પિતૃવનદશદિગ્વૃક્ષગા ભૈરવાશ્ચ ।
સૌધાસ્વાદપ્રમત્તાઃ પ્રકટિતવિકટાટોપસિંહાટ્ટહાસાઃ
સ્વસ્વવ્યાપારપુષ્પૈઃ પરમશિવગુરું ત્વાં વિભો પૂજયન્તિ ॥ ૭॥

ભૂતાઃ પ્રેતાઃ પિશાચાઃ સ્વવિકૃતિવિભવૈઃ પ્રાપ્તબીભત્સવેષા
    યોગિન્યસ્તે શ્મશાનાવરણગતમહાદેવતા ભાસયન્તિ ।-
દેવાસ્તે પૂર્વદેવા મધુરસમુદિતા વિસ્મયાવિષ્ટચિત્તાઃ
    શાન્તા ધ્યાયન્તિ ગાયન્ત્યપિ પરમશિવ ત્વાં મુદોપાસતે ચ ॥ ૮॥

બ્રહ્મા વેદોક્તિગાનૈર્હરિરપિ કમલૈસ્તાણ્ડવૈશ્ચણ્ડરુદ્રા-
    સ્તૌર્યત્રય્યા મહેન્દ્રો નિજનિજવિષયૈરન્યદિક્પાલદેવાઃ ।
સિદ્ધાઃ સર્વે મુનીન્દ્રા સ્તુતિનુતિવચનૈઃ સર્વદુર્ગાગણેશા
    નૃત્ત્યૈર્વાદ્યપ્રભેદૈર્વિદધતિ સુમુદં તે મહાદેવ શમ્ભો ॥ ૯॥

સન્તપ્તઃ પ્રેતસિંહાસનવિહિતમહાભૈરવઃ શામ્ભવાગ્નિઃ
    પઞ્ચાશદ્વિસ્ફુલિઙ્ગાક્ષરવિદિતપરાઘોરવિદ્યોગ્રતેજાઃ ।
સત્યાન્તર્યજ્ઞદેવસ્ત્રિભુવનહવિષા તોષિતાત્મીયરશ્મિ-
    ર્વાગર્થવ્યક્તભાવાત્સફુલમિહ તનું વ્યશ્નુવાનો વિભાતિ ॥ ૧૦॥

સર્વજ્ઞાનૈકભૂમિસ્ત્રિભુવનકરવીરાખ્યશૂન્યશ્મશાન-
    જ્ઞાનાકૂપારપૂરશ્રુતમુખબહુવિચ્છાસ્ત્રબોધોદવાહાન્ ।
પ્રજ્ઞાં ગામ્ભીર્યગર્વાત્ગ્રસતિ રવિરિવ સ્વપ્રકાશાત્પ્રકાશા-
    નન્યાનિન્દૂડુમુખ્યાન્નિબિડતરરુચિર્ધ્વાન્તપૂરાંસ્તવાગ્નિઃ ॥ ૧૧॥

શ્રીશમ્ભો વિશ્વમૂર્તે પરમશિવ ગુરો નાથ વિશ્વેશ્વરાત્મ-
    ન્નેષાશેષાર્થવદ્વાક્પ્રસવવિરચિતા સ્રગ્ધરાવૃત્તપૂજા ।
ત્વય્યેવ જ્ઞાનવહ્નૌ હુતવહરસને સંહતા મુક્તયે મે
    ભૂયાદાગઃ ક્ષમસ્વ પ્રવચનપઠિતઃ શ્રીવિભો મે પ્રસીદ ॥ ૧૨॥

ઇતિ શ્રીદૂર્વાસકૃતપરશમ્ભુમહિમ્નસ્તવે વિશેષોપચારપરામર્શે
શાન્તિપ્રકરણં દ્વાદશમ્ ॥ ૧૨॥

---

૧૩. ત્રયોદશં પ્રકરણં ઉપસંહાર

ઇતિ તવ કૃપાદોગ્ધ્રી પૂજા સુભક્તિસ્રુતામૃતા
    જનનમરણપ્રાદુર્ભાવપ્રભેદપટીયસી ।
જનયતિ મુદં બ્રહ્માનન્દપ્રવાહતરઙ્ગિણીં
    દહતિ વિપદઃ પુણ્યં પાપં દુરન્તભવાટવીમ્ ॥ ૧॥

પરશિવ મમ જન્મ ધન્યમેત-
    ત્તવ મહિમસ્તુતિમોચિતો યતોઽહમ્ ।

કુલમિદમખિલં દ્વિધા વિભિન્નં
    પરમપદં ગતમેવ તે પ્રસાદાત્ ॥ ૨॥

હતો માયામૃત્યુર્ગુરુવચનખડ્ગેન મનસઃ
    પ્રભિન્નં માલિન્યં વ્યપહતમહઙ્કારતિમિરમ્ ।
હતા મે કામાદ્યાઃ પ્રબલરિપવઃ સ્વાત્મવિષયાઃ
    મહેશ ત્વત્સેવાવિદિતસુવિવેકાગ્નિમહસા ॥ ૩॥

જાતિર્લજ્જા નિજકુલમદઃ સર્વસંશીતિરાધિ-
    ર્દેહાહન્તાસુકૃતદુરિતદ્વન્દ્વપાશોઽભિમાનઃ ।
સર્વે હ્યેતે મમ વિનિહતાસ્ત્વન્મહાવાક્યસૂર્ય-
    જ્યોતિઃપુઞ્જૈઃ કિમપરમહં દેવ ભદ્રં સમીહે ॥ ૪॥

મદ્વિદ્યાભ્યસનમભૂદિહૈવ સાર્થં સાન્નિધ્યાત્તવ ચ તદુક્તિચરસ્ય ।
અદ્ય ત્વં ત્રિભુવનવાઙ્મનસ્યલભ્યો નિર્બાધઃ સકલપથૈકગમ્યમૂર્તે ॥ ૫॥

શ્રુતિસ્મૃતિમિથઃપથે પ્રચલિતોઽહમેકાન્તતઃ
    પ્રભોઃ શિવગુરોઃ તવ ત્રિજગદુન્નતાજ્ઞાં ગતઃ ।
ભજામિ પરપાવકં ત્રિજગદાત્મહવ્યાશિનં
    ભવન્તમધિદૈવતં ભવવને જ્વલન્તં સ્વતઃ ॥ ૬॥

બ્રહ્મત્વં સુરનાયકત્વમખિલં ક્ષોણીપતિત્વં લસ-
    દ્બ્રાહ્મણ્યં સુરયક્ષનાગપિતૃતા ગન્ધર્વતા સિદ્ધતા ।
એતત્સર્વમનિત્યમેવ ગણિતં નાહં સમીહે સુખં
    કિં તુ ત્વેત્પદપદ્મનિશ્ચલતરધ્યાનં સમીહે વિભો ॥ ૭॥

સમ્પ્રાપ્તા કૃતકૃત્યતા સફલતા વાચાં તવ સ્તોત્રતા
    મૃત્યોરપ્રમિતૈશ્ચ મૃત્યુરભવદ્વશ્યં ગત ત્વત્પદમ્ ।
સંસારાનવધિપ્રચણ્ડજલધિસ્તીર્ણઃ પ્રમોહો હતઃ
    પુણ્યં પાપમગાદ્વિનાશમિહ મે પ્રાપ્તઃ પ્રબોધો વિભો ॥ ૮॥

ઇતિ પરશિવશમ્ભોઽનન્તકાન્તે મહિમ્ન-
    સ્તવવિરચિતમેતત્સ્તોત્રમાત્મોક્તિશક્ત્યા ।
પ્રભવતુ સુમુદે તે ત્વં મમ સ્વાન્તવર્તી
    ભવ ભવગતદુઃખં છિન્ધિ ચાગઃ ક્ષમસ્વ ॥ ૯॥

યાવાંસ્તે જીવલોકઃ પરશિવચતુરાશીતિલક્ષૈકસઙ્ખ્ય-

સ્તત્તત્કર્મપ્રભેદોપગતજનિમૃતી ઘોરસંસારચક્રે ।
સૃષ્ટિસ્થિત્યન્તવૃત્તિં ભજતિ નિરવધિત્વત્પદધ્યાનહીનો
દૃષ્ટ્વૈનં ભીતભીતં શરણમુપગતં ત્રાહિ માં દેવ મૃત્યોઃ ॥ ૧૦॥

દુર્વાસાઃ સત્યવાસાઃ કનકગિરિરિહ કન્દરે મે હૃદાખ્યે
શ્લોકાશ્ચૈતે મૃગેન્દ્રાઃ પદનખદશનાઃ શામ્ભવાસ્ત્રૈકવીર્યાઃ ।
માયાધ્વાન્તેભયૂથપ્રદલનપટવો બ્રહ્માવદ્યાટવીસ્થાઃ
વક્તૃશ્રોતૄન્પ્રમાતૄન્નિજહૃદયગુહાબ્રહ્મસત્તાં નયન્તિ ॥ ૧૧॥

ભૂષ્યં વૈદુષ્યમુદ્યદ્દિનકરકિરણાકારમાકારતેજઃ
પ્રજ્ઞાનં ભૂરિમાનં નિજકરકલિતં દુર્ગમં યોગમાર્ગમ્ ।
આયુષ્યં બ્રહ્મપોષ્યં હરગિરિવિશદાં કીર્તિમભ્યેત્ય ભૂમૌ
દેહાન્તે બ્રહ્મપારં પરશિવચરણાકારમભ્યેત્ય વિદ્વાન્ ॥ ૧૨॥

યે શ્રીશામ્ભવશાસને કૃતધિયઃ શ્રીશાસને કર્મઠાઃ
શ્રૌતસ્માર્તવિધિષ્વમન્દમતયઃ સત્યવ્રતા બ્રાહ્મણાઃ ।
વિદ્વાંસઃ સકલાગમેષુ ચ કલાવિદ્યાસુ તે શામ્ભવ-
બ્રહ્મપ્રાપ્તિમવાપ્નુવન્તિ પઠનાચ્છમ્ભોર્મહિમ્નસ્તુતેઃ ॥ ૧૩॥

સ્તોત્રં ચૈતત્પટેદ્યઃ શિવગુરુવદનાદ્યોરવિદ્યાત્તદીક્ષઃ
સત્યજ્ઞાનપ્રકાશાત્પ્રબલભવરિપું પુણ્યપાપાદ્યવિદ્યામ્ ।
ભિત્વા મુક્તો વિકલ્પસ્ત્રિજગતિ મહિતં સૌખ્યમાત્મપ્રબોધં
તેજઃ કીર્તિં ચ લક્ષ્મીમભિલષિતપદં વ્યશ્નુતે સ્તોત્રવીરઃ ॥ ૧૪॥

મહિમ્નસ્તોત્રસ્ય ત્રિભવનગુરોર્યો જપરતઃ
પરાશક્તેસ્તત્ત્વં પરશિવપદં વેત્તિ સ બુધઃ ।
અગાધં ગામ્ભીર્યં સ્તુતિગતમનન્તપ્રમિતિજં
સમસ્તાઃ સિદ્ધીરપ્યનુભવતિ ગચ્છેત્પરપદમ્ ॥ ૧૫॥

શ્રીક્રોધભટ્ટારકદિવ્યનામ્ના દુર્વાસસા સૂક્તમહામહિમ્નઃ ।
સ્તોત્રં પઠેદ્યો ભુવનાધિપત્યં નિત્યં ગુરુત્વં શિવતામુપૈતિ ॥ ૧૬॥

મહેશાન્નાપરો દેવો મહિમ્નો નાપરા સ્તુતિઃ ।
અઘોરાન્નાપરો મન્ત્રો નાસ્તિ તત્ત્વં ગુરોઃ પરમ્ ॥ ૧૭॥

સદસદનુગ્રહનિગ્રહગૃહીતમુનિવિગ્રહો ભગવાન્ ।
સર્વાસામુપનિષદાં દુર્વાસા જયતિ દેશિકઃ પ્રથમઃ ॥ ૧૮॥

શ્રીગુરુકરુણાલક્ષ્યો યઃ કોઽપ્યાત્મવિદનુગૃહીતિપરઃ ।
પરશમ્ભુસ્તુતિબોધો જગદાધારો ભવેત્સદા ધીરમ્ ॥ ૧૯॥

પરશમ્ભોસ્તવ પદ્યં રવિપ્રકરણં પઠંસ્ત્રિકાલેઽપિ ।
રવિરિવ જગત્પ્રકાશમતિચાતુર્યાજ્જગદ્ગુરુર્ભવતિ ॥ ૨૦॥

તસ્માત્સ્મૃતિમતિબુદ્ધિપ્રજ્ઞાવાનાત્મવિન્મહાદેવઃ ।
પરશમ્ભોસ્તવ હૃદયં સત્પાત્રેષુ પ્રકાશયેત્સદયમ્ ॥ ૨૧॥

ઇતિ શ્રીદૂર્વાસકૃતપરશમ્ભુમહિમ્નસ્તવે
ઉપસંહારપ્રકરણં ત્રયોદશમ્ ॥ ૧૩॥

ઇતિ શ્રીક્રોધભટ્ટારકાપરનામ્ના મહામહિમ્ના દુર્વાસસા મુનીશ્વરેણ
વિરચિતપરશમ્ભુમહિમ્નસ્તવઃ સમ્પૂર્ણઃ ॥

Encoded and proofread by Sunder Hattangadi

*Parashambhumahimnastava*
pdf was typeset on February 3, 2022

Please send corrections to *sanskrit@cheerful.com*